# SANSKRIT LITERATURE

## SKT1 C01

## I SEMESTER

## Core Course

## M.A. SANSKRIT GENERAL
## 2019 Admission

**UNIVERSITY OF CALICUT,**
**School of Distance Education,**
**Calicut University P.O.,**
**Malappuram - 673 635, Kerala.**

**190201**

# University of Calicut

## School of Distance Education,

## Study Material

## I SEMESTER

## Core Course

## M.A. SANSKRIT GENERAL

# *SANSKRIT LITERATURE*

**Prepared by:**

***Dr. K. INDIRA,***

*Assistant Professor on contract in Sanskrit,*

*School of Distance Education,*

*University of Calicut.*

**Scrutinized by:**

***Dr. PUSHPADASAN KUNIYIL,***

*Associate Professor & Director,*

*Sree Sankaracharya University of Sanskrit,*

*Regional Campus, Koyilandy.* .

***DISCLAIMER***

"The author shall be solely responsible for the content and views expressed in this book"

# SKT1CO1 SANSKRIT LITERATURE

Unit I: a) General Study of *Kavya literature*

- *pancamahakavyas*- their salient features
- Special focus on *Naiṣadhiyacarita*

b) General study of Sanskrit plays

- The place of *Mudrarakṣasa* in the world of Sanskrit dramas
- Social and political aspects
- Literary appreciation

Unit II: - Intensive study of *Naiṣadhiyacarita*: Canto I, Verses 1-65

Unit III:- Intensive study of *Mudrarakṣasa*

# Unit 1
## पञ्चमहाकाव्यानि

कवयतीति कविः, तस्य कर्म काव्यम्। एतत् काव्यं गद्य - पद्य मिश्रभेदेन त्रिविधं भवति। तत्र पद्यस्य बहवः भेदाः सन्ति। तेषु अन्यतमं भवति महाकाव्यम्। महाकाव्यमधिकृत्य ईशानसंहितायां एवमुक्तं भवति-

अष्टसग्रान्न तु नूनं त्रिंशत्यसर्गाच्च नाधिकम्।

नात्यन्तविस्तरः सर्गस्त्रिंशतो वा न चोनता।।

प्रसिद्धालङ्कारिकेण दण्डिमहाशयेन स्वस्य काव्यादर्शस्य प्रथमपरिच्चेदे महाकाव्यस्य समग्रं लक्षणं एवमुक्तम्-

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।

आशिर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्।।

इतिहासकथोद्भतमितरद्व सदाश्रयम्।

चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्।।

नगरार्णवशैलर्त्तुचन्द्रार्कोदयवर्णनैः।

उद्यानसलिलक्राडा मधुपानरथोत्सवैः।।

विप्रलम्भैर्विवाहैश्च कमारोदयवर्णनैः।

मन्त्रद्यूतप्रयाणाजिनायकभ्युदयैरपि।।

अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम्।

सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः। ।

सर्वत्र भिन्नवत्तान्तैरुपेतं लोकरञ्जकम्।

काव्यं कल्पान्तरस्थायि जायेत भवनत्रयम्।।इति।

महाकाव्यानि सर्गयुक्तानि भवेयुः। तेषां आरम्भे आशीर्वादपद्यं वा, नमस्क्रियापद्यं वा, वस्तुनिर्देशपद्यं वा कर्तव्यम्। नगरस्य, समुद्रस्य, पर्वतस्य, ऋतूनां, सूर्यचन्द्रयोः उदयस्य च वर्णनं करणीयम्। उद्यानं जलक्रीडा, मधुपानं, सम्भोगविप्रलम्भशृङ्गारौ, विवाहः, पुत्रजन्म, मन्त्रः, दूत, विजययात्रा, युद्ध, नायकोदयः- इत्येषां वर्णनैः युक्तानि भवेयुः। अत्र रसभाववृत्तसन्ध्यादयश्च अवश्यं करणीयाः। एतया रीत्या निर्मितानि महाकाव्यानि कल्पावसानपर्यन्तस्थायीनि जायन्ते।

संस्कृतकाव्यप्रपञ्चे प्रचलितानां महाकाव्यानां मध्ये पञ्चमहाकाव्यानि प्रसिद्धानि भवन्ति। तानि यथा-

१. कालिदासस्य रघुवंशः।

२. कालिदासस्य कमारसम्भवम्।

३. भारवेः किरातार्जुनीयम्।

४. माघस्य शिसुपालवधम्।

५. श्रीहर्षस्य नैषधीयचरितम्।

## रघुवंशः

विशवसाहित्ये संस्कतसाहित्यमिव संस्कतसाहित्ये कालिदाससाहित्यं सुप्रसिद्धं भवति। तस्य जावनकालजन्मदेशादिविषये विभिन्नमतानि प्रचलन्ति। कालिदासेन रघुवंशः, कुमारसम्भवमिति द्वे महाकाव्ये, मेघदूतम्, ऋतुसंहारः

इति द्वे खण्डकाव्ये अभितज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् इति त्रीणि नाटकानि च विरचितानि।

संस्कतसाहित्ये वर्तमानेषु पञ्चमहाकाव्येषु रघुवंशः प्रथमस्थानमलङ्करोति। तत्र एङ्कोनविंशति सर्गाः सन्ति। कालिदासस्य उपमाप्रयोगस्य सुप्रसिद्धानि उदाहरणानि अस्मिन् काव्ये द्रष्टुं शक्यन्ते। दीपशिखा कालिदासः इति प्रसिद्धोक्तेः उदाहरणं रघुवंशात् उद्धृतं एव। अलङ्कारसंयोजने, प्रकृतिसौन्दर्यस्य वर्णनायां, ललितपदविन्यासे च कालिदासः अतीव वैदग्ध्यं प्रकटितवान्।

रघुवंशमहाकाव्यं वागर्थौ इव मिलितयोः पार्वतीपरमेश्वरयोः वन्दनया एव आरभ्यते। अत्र वंशस्थापकस्य रघोः पितुः दिलीपमहाराजस्य कथायाः आरभ्य अग्निवर्णपर्यन्तं एकोनत्रिंशन्महाराजानां कथा अतिमनोहररीत्या वर्ण्यते। तत्रत्य आदिमसप्तदशसर्गेषु दिलीपादारभ्य अतिथिपर्यन्त सप्तमहाराजानां कथा विस्तरेष प्रतिपाद्यते। अष्टादशसर्गे विंशतिमहाराजानां कथा च वर्णिता। एकोनविंशतिसर्गे अन्तिमराजस्य विषयलम्पटस्य अग्निवर्णस्य शासनम्, अत एव सम्भूतं वंशनाशं च प्रतिपादयति। रघुवंशमाहाकाव्ये अनेकेषां महाराजानां राज्यभारवर्णनानि तथा प्रकृतिसौन्दर्यद्योतकानि वर्णनानि च दृश्यन्ते। अनपत्यतया दुःखितयोः सुदक्षणादिलीपयोः नन्दिनीपरिपालनं, ततः तोः पुत्रप्राप्तिः, रघोः विजययात्रा, इन्दुमतीस्वयंवरवर्णनं, अजविलापः, रामरावणयुद्धं, सीतारामयोः आकाशयात्रायां कता प्रकृतिवर्णना च अत्र प्रधाना भवन्ति। एवं ललितपदसन्निवेशकृतैः वर्णनैः अतिमनोहर भवति रघुवंशमहाकाव्यम्।

## कुमारसम्भवम्

सप्तदशसर्गेषु निबद्धं कुमारसम्भवं महाकाव्यं कालिदासस्य सर्वोत्कृष्टं शृङ्गारकाव्यं भवति। पर्वतराजस्य महिमानं उद्घुष्य प्रारब्धस्य अस्य महाकाव्यस्य प्रथमसर्गे पर्वतराजपुत्र्याः पार्वत्याः बाल्यादारभ्य चरितं, तस्याः

श्रीपरमेश्वरं प्रति अनुरागवर्णनं च कृतम्। द्वितीये तारकासुरसृतोपद्रवाः पार्वतीपरमेश्वरयोः पुत्रस्यैव तारकासुरवधे शक्तिप्रभवः इति ब्रह्मोपदेशश्च वर्णिताः। तृतीये तु देवेन्द्रस्य आदेशेन कामदेवस्य रत्या वसन्तेन च सह तपश्चरतः परमेश्वरस्य समीपे आगमनं, परमेश्वरतृतीयनेत्राग्निना कामदेवदहनं च उपवर्ण्यन्ते। कामदहनानन्करं दुःखितायाः रतीदेव्याः विलापः चतुर्थसर्गे विस्तरेण उपपाद्यते। पञ्चमे तु स्वाभिलाषपूर्तये पारवत्याः तपश्चर्या, ब्रह्मचारिरूपेण श्रीपरमेश्वरस्य परीक्षणं, परमेश्वस्य स्वरूपप्रदर्शनं च वर्ण्यविषयरूपेण दृश्यन्ते। पार्वतीपरमेश्वरयोः विवाहादारभ्य कुमारोत्पत्तिपर्यन्तकथा षष्ठ-सप्त-अष्टसर्गेषु उपवर्णिता। अष्टमसर्गपर्यन्तमेव इदं काव्यं कालिदासेन विनिर्मितमिति बहूनां पण्डितानां मतम्। किञ्च कालिदासकृतीनां व्याख्याता मल्लिनाथेन अष्टमसर्गपर्यन्तमेव व्याख्यायते। किन्तु सप्तदशसर्गयुक्त कुमारसम्भवं महाकाव्यं कालिदासविरचितं अद्य उपलभ्यते।

## किरातार्जुनीयम्

संस्कृतसाहित्ये अलङ्कृतशैल्याः प्रवर्तकस्यापि भारवे ध्यानं विशेषरूपेण अर्थगौरवे स्थितम्। अत एव भारवेरर्थगौरवम् इति लोकोक्तिः अत्यन्तख्यातिं प्राप्ता। कविवरः भारविः विपुलान् अर्थान् ललितेषु शब्देषु सन्निवेश्य स्वस्य काव्यकुशलतां प्रकटीकरोति। भारवेः जीवनकालमधिकृत्य विभिन्नमतानि सन्ति। तथापि सः क्रि.व. षष्ठशतके जीवनमाधारयदिति विद्वांसः मन्यन्ते।

सर्वविधलक्षणयुक्ते किरातार्जुनीयमहाकाव्ये अष्टादशसर्गाः सन्ति। महाभारतस्य वनपर्वादुद्धृतः अर्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तः अस्य इतिवृत्तम्। द्युते पराजिताः युधिष्ठिरादयः वनवासपूर्त्यर्थं द्वैतवनं प्राप्तवन्तः। तत्रस्थाः ते दुर्योधनवृत्तान्तं विप्रवेषधारिणः कस्माच्चित् किरातदूतात् ज्ञात्वा दुर्योधनं प्रति युद्धं कर्तुं निश्चियं कुर्वन्ति। तदर्थं व्यासनिर्देशानुसारं अर्जुनः शिवात् पाशुपतास्त्रलाभाय हिमालये घोरतपः कर्तुं आरब्धवान्। अर्जुनं परीक्षितुं शिवः किरातवर्षेण तत्र आगच्छति। शूकरवधमधिकृत्य संजातः

विवादः युद्धरूपेण परिणतः। तदवसरे अर्जुनस्य असामान्यपराक्रमपाटवं दृष्ट्वा संप्रीतः परमेश्वरः अर्जुनाय पाशुपतास्त्रं ददाति। एवं रृतं किरातार्जुनीयमहाकाव्यं सहृदयहृदय हठादाकर्षयति।

## शिशुपालवधम्

संस्कृतमहाकविषु उपमा-अर्थगौरव-पदलालित्यानि प्रत्येकं एकैकस्मिन् सन्ति। किन्तु एते त्रयो गुणाः माघे विशेषेण भासन्ते। अत एव उक्तं माघे सन्ति त्रयो गुणाः इति। माघस्य जीवनकालः क्रि.व. अष्टशतकमिति समालोचकैः अनुमितिः।

शिशुपालवधस्य कर्ता माघः भवति। माघेन विरचितत्वात् एतत्काव्यं माघम् इति नाम्नाऽपि प्रसिद्धम्। तत्र विंशतिसर्गाः सन्ति। महाभारताश्रिता शिशुपालवधात्मिका कथा अत्र वर्णिताऽस्ति। नारदात् युधिष्ठिरयज्ञवृत्तान्तं तथा शिशुपालवधाय शुकसंन्देशं च श्रुत्वा श्रीकृष्णः स्वसैन्यैः सह युधिष्ठिरसमीपं गच्छति। ततः द्वादशसर्गपर्यन्तं रैवतकपर्वतस्य षट्ऋतूनां, जलक्रीडायाः, प्रभातस्य, यमुनानद्यश्च वर्णनं दृश्यते। अनन्तरं कृष्णपाण्डवसमागमः. श्रीकृष्णस्य नगरप्रदेशः, शिशुपालस्य क्रोधः, युद्धाया सन्नद्धता, दूतसंवादः, प्रयाणं, युद्धम्, अन्तिमे शिशुपालस्य वधः च माघेन अतिमनोहररीत्या उपवर्णिताः। नवनवशब्दानां प्रयोगबाहुल्येन नवसर्गे गते माघे नवशब्दो न विद्यते इति लोकोक्तिः अतिशयेन प्रचलिता।

## नैषधीयचरितम्

नैषधीयचरितमहाकाव्यस्य कर्ता श्रीहर्षः भवति। सः कन्याकुब्जाधीश्वरयोः विजयचन्द्रजयचन्द्रयोः सभापण्डितः आसीत्। तस्य जीवनकालः द्वादशशतकं भवति। तस्य पिता हीरः माता मामल्लदेवी च भवति।

पञ्चमहाकाव्येषु प्रौढं श्रेष्ठं च भवति नैषधीयचरितम्। तत्र द्वाविंशतिसर्गाः सन्ति। अस्य इतिवृत्तं महाभारतस्य नलोपाख्यानात् स्वीकृतमेव।

नलश्रीवर्णनादारब्धमिदं महाकाव्यं नलदमयन्त्योः सुखसङ्गमं प्राप्य विश्राम्यति। तत्र प्रथमे दमयन्त्याः स्मृत्या विरहन् नलः एकं स्वर्णमयं हंसं पश्यति, तं गृह्णाति च। हंसः स्वामवस्थां निवेद्य मोचनं प्रार्थयति। राज्ञः प्रीत्यर्थं हंसः विदर्भानगरीं गत्वा तस्य अनुरागं दमयन्तीं प्रति ज्ञापयति। किन्तु तत्समये विदर्भराजेन दमयन्त्याः स्वयंवरसभा आयुज्यते। यद्यपि तत्र चत्वारः दिक्पालाः नलरूपं धृत्वा आगच्छन्ति, तथापि दमयन्त्याः नलं प्रति अनुरागं ज्ञात्वा ते स्वरूपाण्येव गृह्णन्ति। ततः दमयन्ती नलं स्वयंवरस्त्रजा विभूषयति। अथ ईर्ष्यया कलिः नलं प्रविश्य तं विरूपयति। अन्ते लब्धस्वरूपेण नलेन सह दमयन्त्याः सुखसङ्गमो भवति च।

अस्य काव्यस्य शैली, वर्णनारीतिः, पदानां प्रयोगश्च अतिक्लिष्टं भवति। एवंकृतवैशिष्ट्यात् एवमुच्यते नैषधं विद्वदौषधम् इति। काव्यानुशीलनार्थं साहित्यपठितृभिः उपयुक्तः आदिग्रन्थो भवति नैषधीयचरितम्। अत एव उक्तं उदिते नैषधे काव्ये क्व माघः क्व च भारविः इति।

## मुद्राराक्षसम्

मुद्राराक्षसम् विशाखदत्तेन लिखितं संस्कृतनाटकम्। चाणक्यः धननन्दस्य निग्रहं कर्तुं चन्द्रगुप्तमौर्यम् उपकरोति। चन्द्रगुप्तः राज्ञा पर्वतकेन सह नन्दराज्यं जयति। ततः युक्त्या विषदग्धः पर्वतकः म्रियते। तस्य पुत्रः मलयकेतुः नन्दमन्त्री राक्षसः च मगधं जेतुं योजनां कुरुतः। परं चाणक्यः छलेन मलयवे जयति।

संस्कृतस्य निखिलेभ्यः नाटककारेभ्यः भिन्नोऽयं विशाखदत्त नामा नाट्यकारः यः कूट , राजनीतिज्चाश्रित्य नाटकं निर्मितवान्। कवेः राजवंशसम्भवात् राजनीतिषु पक्षपातो दृश्यते।

विशाखदत्तस्य पितामहः श्रीवटेश्वरदत्तः वत्सराजाभिधस्य देशस्य सामन्तराजाऽऽसीत्। पिता चास्य भास्करदत्त 'महाराजा' इत्युपाधिनामङ्कृत आसीत्। विशाखदत्तः कौटिल्यार्थशास्त्रस्य शुक्रनीतिशास्त्रस्य च प्रकाण्डविद्वान् आ । ज्योतिः दर्शनन्यायशास्त्रेषु चास्य नैपुण्यं दृश्यते। वैदिकधर्मावलम्बी विशाखदत्तः बौध्दधर्ममपि अत्यादरेण समवलोकयति स्म अस्यैतानि नाटकानि प्राप्यन्ते - (१) मुद्राराक्षसम्, (२) देवीचन्द्रगुप्तम्, (३) अभिसारितवञ्चितकम्।

अस्य नाटकस्य नायकचन्द्रगुप्तश्चाणक्यो वेति विचारविषयः। केचित् प्रधानफलाश्रयतायां चन्द्रगुप्तं नायकं मन्येन्तेऽपरे कथातन्तुसञ्चालनप्रधानतया चाणक्यमेव नायकं स्वीकुर्वन्ति। वस्तुतत्त्वे चिन्त्यमाने चाणक्य एव नायकः सिद्ध्यति। मुद्रया निगृहीतो राक्षसो यत्र तन्मुद्राराक्षसमिति व्युत्पत्तौ मुद्राप्रवर्तकस्य नायकत्वं । सत्यव्रतसिंहद्विजेन्द्रनाथावपि मतमिदं समर्थयतः विशाखदत्तस्य देवीचन्द्रगुप्तं नाम नाटकान्तरम्।

विशाखदत्तकृतं देवीचन्द्रगुप्तनामकं नाटकान्तरमपि प्राप्यते रामचन्द्रगुणचन्द्रकृते नाटकदर्पणे नाम ग्रन्थेऽस्य विस्तृतमुध्दरणं प्राप्यते। भौजस्य सरस्वतीकण्ठाभरणे अभिन अभिनवभारत्थां चास्योल्लेखो दृश्यते। अत्र नाटके शकराजस्य कारागारात् रामगुप्तस्य महिष्या ध्रुवदेव्याः चन्द्रगुप्तकृत उध्दारो

वर्णितः । एतन्नाटकेतिवृत्तमादायैव जयशङ्करप्रसादेन हिन्दी भाषायां ध्रुवस्वामिनी' नाम नाटकं प्रणीतम्।

नाटकमिदम् आद्यन्तं यावत् ओजस्विताया पौरुषस्य चोपरि आधारिभूतमस्ति। पि महाकविभा 'प्रतिज्ञयौगन्धरायणम्' कूटनीत्याधारीभूतं नाटकं विद्यते, परमस्मिन् मुद्राक्षसे या ओजस्विता दरीदृश्यते। न सा प्रतिज्ञायौगन्धरायणे संस्कृतसाहित्ये 'वेणीसंहारम्' निःसन्देहं वीररस्स्य सफलं नाटकमस्ति, परन्तु अनेनापिमुद्राराक्षसस्य तुलना कर्तु न शक्यते। हि वेणीसंहारनाटके युध्द- भीषणता, नाटकस्य वातावरण नितरां भयावहं करोति स्थाने स्थ सैनिकानाम् अन्योऽन्यसंघट्टने नाटकस्य वातावरणं सर्वदेव खटखटायते अतः ऐतिहासिक राजनैतिक वथाभूतं वीररसपूर्णमपि वेणीसंहारनाटकं' मुद्राराक्षसस्य न तुलामुपयाति। मुद्राराक्षसेऽपि युद्धं तु भवति, परमन्त्र सैनिकानां युद्धं न भवति द्वयो राजनीतिज्ञयोः राजनीति समराङ्गणे कूटबुद्ध्यस्त्रेण समरं भवति नास्त्रेण"न, धनुषापि व। चन्द्रगुप्तस्य कथनमिदम् विर्नव युध्दादार्येण जित दुर्जय परबलमिति युक्तियुक्तं प्रतिभाति। अतः मुद्राराक्षसं टकसाहित्येऽद्वितीया कृतिरिति कथने नातिशयोक्तिः। मुद्राराक्षसे विशाखदत्तस्य शैली पुरुषार्थपूर्णास्ति। पुत्रानुरुपं भावनिरुपणं तथा भाषाप्रयोगश्च दृश्यते। तृतीयाङ्के शरदर्तोः वर्णनं नितान्तं प्रभावपूर्ण विद्यते ।

विशाखदत्तः नाटकं वीररसपूर्णं तथौजपूर्णं च कर्तुं यथाशक्तिः प्रयत्नशीलः दृश्यते सफलश्चाभूत्। पाराणां चरित्रचित्रणेऽपि कविप्रतिभा सर्वातिशायिनी। - भावयोः शैलीपात्रचरित्रचित्रणयोः कविशक्तेश्च सम्यकतया कृतायां समालोचनायां मुद्राराक्षसः विशाखदत्तस्य अद्वितीयं ऐतिहासिकं नाटकमस्ति।

******

# UNIT II: Intensive study of Naisadhiyacarita

## Canto I (first 65 verses)

अथ तत्र भवांश्चिन्तामणिमन्त्रचिन्तनप्राप्ताऽलौकिकप्रतिभा- परकर्षो महाकविः श्रीहर्षः पुण्यश्लोकश्लोकनपरं नैषधीयचरिताऽभिधानं महाकाव्यं विधित्सुरादौ वस्तुनिर्देशरूपं मङ्गलं निर्दिशति निपीयति-

**निपीय यस्य क्षितिरक्षिणः कथां तथाऽऽद्रियन्ते न बुधाः सुधामपि।**

**नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः।। १**

**अन्वयः-**

यस्य क्षितिरक्षिणः कथां निपीय बुधाः सुधां अपि यथा न आद्रियन्ते। सितच्छत्रितकीर्तिमण्डलः महसां राशिः महोज्ज्वलः स नल आसीत्।

**व्याख्या-**

यस्य = प्रकृतस्य, क्षितिरक्षिणः = भूपतेः, कथानायकस्य नलस्येति भावः। कथां = उपाख्यानं, निपीय = नितरामास्वाद्य, सादरं श्रुत्वेति भावः। बुधाः = विद्वांसः, सुधां अपि = अमृतम् अपि, तथा = तेन प्रकारेण, न आद्रियन्ते = न आदरं कुर्वन्ति, बुधाः सुधां उपेक्ष्य नलकथां बहु मन्यन्त इति भावः। सितच्छत्रितकीर्तिमण्डलः = शुक्लातपत्रीकृतयशोमण्डलः, महसां = तेजसां, राशिः = समूहः, रविरिवेतिभावः। महोज्ज्वलः = उत्सवदीप्यमानः, नित्यमहोत्सवशालीति भावः। सः = प्रसिद्धः, नलः = नलनामको राजा, आसीत् = अभवत्।

रसैः कथा यस्य सुधाऽवधीरिणो नलः स भूजानिरभूद्गुणाद्भुतः।

सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः।। २

**अन्वयः-**

यस्य कथा रसैः सुधाऽवधीरिणी, भूजानिः स नलः सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डल गुणाऽद्भुतः अभूत्।

**व्याख्या-**

यस्य = नलस्य, कथा = उपाख्यानं, रसैः = स्वादैः, श्रृङ्गारादिरसैर्वा, सुधाऽवधीरिणी = अमृततिरस्कारिणी, भूजानिः = भूपतिः, सः = पूर्वोक्तः, नलः = तदाख्यो नृपः, सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः = स्वर्णदण्डैकशुक्लच्छत्रितदीप्यमानतेजः पङ्क्तियशोमण्डलः, अत एव गुणाऽद्भुतः = शौर्यदाक्षिण्यादिभिराश्चर्यभूतः, अभूत् = आसीत्।

पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा।

कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति।। ३

**अन्वयः-**

अत्र युगे यत्कथा स्मृता (सती) रसक्षालनया इव जगत् पवित्रं आतनुते। सा आविलां अपि स्वसेविनीं एव मद्गिरं कथं न पवित्रयिष्यति?

**व्याख्या-**

कविः स्वविनयं प्रदर्शयति – पवित्रमिति। अत्र = अस्मिन्, युगे = कलियुग इत्यर्थः। यत्कथा = यस्य (नलस्य) कथा (उपाख्यानम्), स्मृता = चिन्तिता (सती), रसक्षालनया इव = जलधावनेन इव, जगत् = लोकं, पवित्रं =

विशुद्धम्, आतनुते = करोति। सा = नलकथा, आविलां अपि = कलुषां अपि, सदोषां अपीति भावः, स्वसेविनीं एव = आत्मवर्णनपरां एव। मद्गिरं = मद्वाचं, नैषधवर्णनरूपामिति भावः। कथं = केन प्रकारेण, न पवित्रयिष्यति = पवित्रां न करिष्यति? पवित्रां करिष्यत्येवेति भावः।

**अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।**

**चतुर्दशत्वं कृतवान्कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्।। ४**

**अन्वयः-**

अयं चतुर्दशसु विद्यासु अधीतिबोधाचरणप्रचारणैः उपाधिभिः चतस्रः दशाः प्रणयन् स्वयं चतुर्दशत्वं कुतः कृतवान्? (इति) न वेद्मि।

**व्याख्या-**

नलस्य चतुर्दशविद्याध्ययनं प्रतिपादयति - अधीतिति। अयं = नलः, चतुर्दशसु = चतुर्दशसंख्यकासु, विद्यासु = वेदादिषु, अधीतिबोधाचरणप्रचारणैः = श्रवणाऽर्थज्ञानतदर्थाऽनुष्ठानप्रसारणैः, उपाधिभिः = भेदैः, चतस्रः = चतुःसंख्यकाः, दशाः = अवस्थाः, प्रणयन् = कुर्वन्, स्वयं = आत्मना, चतुर्दशत्वं = चतुर्दशसंख्यकत्वं, कुतः = कस्मात्, कृतवान् = विहितवान्, इति, न वेद्मि = नो जाने, चतुर्दशसंख्यकानां विद्यानां चतुरावृत्या षट्पञ्चाशत्वमापादनीयं, कथं केवलं चतुर्दशत्वमिति भावः, चतुरवस्थात्वं कृतवानिति विरोधपरिहारः।

**अमुष्य विद्या रसनाऽग्रनर्तकी त्रयीव नीताऽङ्गगुणेन विस्तरम्।**

**अगाहताऽष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्।। ५**

**अन्वयः-**

अमुष्य रसनाऽग्रनर्तकी विद्या, त्रयी इव अङ्गगुणेन विस्तरं नीता (सती) नवद्वयद्वीपपृथग्जयश्रियां जिगीषया अष्टादशतां आगाहत।

**व्याख्या-**

नलस्याऽष्टादशविद्याऽभिज्ञतां प्रतिपादयति - अमुष्येति। अमुष्य = नलस्य। रसनाऽग्रनर्तकी = जिह्वाग्रसञ्चारिणी, विद्या = पूर्वोक्ता वेदादिविद्या सूदविद्या च रसनाऽग्रनर्तनधर्मादिति भावः, त्रयी इव = त्रिवेदी इव, अङ्गगुणेन = शिक्षाद्यङ्गावृत्या, विस्तरं = वृद्धिं, नीता = प्रापिता सती, नवद्वयद्वीपपृथग्जयश्रियां = अष्टादशद्वीपपृथग्विजयलक्ष्मीनां, जिगीषया = जेतुमिच्छया (इव) अष्टादशतां = अष्टादशसंख्यकत्वम्, आगाहत = अभजत।

**दिगीशवृन्दांऽशविभूतिरीशिता दिशां स कामप्रसभाऽवरोधिनीम्।**

**बभार शास्त्राणि दृशं द्वयाऽधाकां निजत्रिनेत्राऽवतरत्वबोधिकाम्।। ६**

**अन्वयः-**

दिगीशवृन्दांऽशविभूतिः दिशां ईशिता सः शास्त्राणि कामप्रसभाऽवरोधिनीं निजत्रिनेत्राऽवतरत्वबोधिकां द्वयाऽधिकां दृशं बभार।

**व्याख्या-**

नलस्य देवांशत्वं प्रतिपादयति – दिगीशेति। दिगीशवृन्दांऽशविभूतिः = इन्द्रादिदिक्पालमात्रोद्भवः, दिशां = प्राच्यादिकाष्ठानाम्, ईशिता = ईश्वरः, सः = नलः, शास्त्राणि = वेदादिशास्त्राणि (एव), कामप्रसभाऽवरोधिनीं = इच्छायाः कामदेवस्य वा बलाऽवरोधकारिणीं, निजत्रिनेत्राऽवतरत्वबोधिकां =

स्वत्रिनयनाविर्भावज्ञापिकां, स्वमहादेवाऽवतारत्वज्ञापिकां वा, द्वयाऽधिकां = द्वितयाऽतिरिक्तां, तृतीयमिति भावः, दृशं = नेत्रं, बभार = धृतवान्।

**पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे ?**

**भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्दवावधर्मोऽपि कृशस्तपस्विताम्।। ७**

**अन्वयः-**

अमुना कृते सुकृते चतुर्भिः पदैः स्थिरीकृते (सति) के तपो न प्रपेदिरे यत् अधर्मोऽपि अङ्घ्रिकनिष्ठया भुवं स्पृशन् कृशः (सन्) तपस्वितां दधौ।

**व्याख्या-**

अथ नलस्य स्वभावं दर्शयति – पदैरिति। अमुना = नलेन, कृते = सत्ययुगे, सुकृते = धर्मे, चतुर्भिः = चतु सख्यकैः, पदैः = चरणै, वृषरूपत्वादितिशेषः। स्थिरीकृते = निश्चलीकृते (सति)। तपोज्ञानयज्ञदानरूपैः पदैरयमर्थो धर्मपक्षे योज्यः। के = जनाः, तपः = चान्द्रायणादिरूपं नियमाचरणं, न प्रपेदिरे = न प्राप्तवन्तः, अपि तु सर्व एव तपश्चक्रुरित्यर्थः। यत् = यतः, अधर्मोऽपि = धर्मविरोध्यपि, किमुत अन्य इति अपिशब्दाऽर्थः। अङ्घ्रिकनिष्ठया = चरणकनिष्ठया, भुवं = भूमिं, स्पृशन् = आमृशन्, कृशः = दुर्बलः (सन्), तपस्वितां = तापसत्वं, दीनत्वं च, दधौ = धारयामास, नलस्य शासनादधर्मोऽपि धर्मव्यापृतचित्तोऽभूदिति भावः।

**यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापाऽनलधूममञ्जिम।**

**तदेव गत्वा पतितं सुधाऽम्बुधौ दधाति पङ्कोभवदङ्कतां विधौ।। ८**

**अन्वयः-**

अस्य यात्रासु बलोद्धतं स्फुरत्प्रतापाऽनलधूममञ्जिम यत् रजः, तद् एव गत्वा सुधाऽम्बुधौ पतितम् (अतएव) पङ्कीभवत् (सत्) विधौ अङ्कतां दधाति।

**व्याख्या-**

अस्य = नलस्य, यात्रासु = विजययानेषु, बलोद्धतं = सैन्योत्क्षिप्तं, स्फुरत्प्रतापाऽनलधूममञ्जिम = ज्वलत्तेजोऽग्निधूममञ्जु, यत्, रजः = धूलिः, तद् एव = रज एव, गत्वा = व्रजित्वा, उत्क्षेपवेगादिति भावः। सुधाऽम्बुधौ = क्षीरसमुद्रे, पतितम् = निपतितं सत्, अतएव, पङ्कीभवत् = कर्दमीभवत् सत्, विधौ – चन्द्रमसि, सुधाऽम्बुधिस्थित इति भावः, अङ्कतां = कलङ्कत्वं, दधाति = धारयति।

**स्फुरद्धनुर्निःस्वनतद्घनाऽशुगप्रगल्भवृष्टिव्ययितसय सङ्गरे।**

**निजस्य तेजः शिखिनः परःशता वितेनुरङ्गारमिवाऽयशः परे।। ९**

**अन्वयः-**

सङ्गरे परःशताः परे स्फुरद्धनुर्निःस्वनतद्घनाशुगप्रगल्भ- वृष्टिव्ययितस्य निजस्य तेजः शिखिनः अङ्गारं इव अयशः वितेनुः।

सङ्गरे = युद्धे, परःशताः = शतात् परे, शताधिका इत्यर्थः, बहव इति भावः। परे = शत्रवः, स्फुरद्धनुर्निःस्वनतद्घनाशुगप्रगल्भवृष्टिव्ययितस्य = प्रसरच्चापघोषसमन्वितनलमोघबाणमहावर्षनिर्वापितस्य, निजस्य = स्वस्य, तेजः शिखिनः = प्रतापाग्नेः, अङ्गारं इव = उल्मुकम् इव, अयशः = अकीर्तिं पराजयजनितामिति भावः। वितेनुः = विस्तारयामासुः।

**अनल्पदग्धाऽरिपुराऽनलोज्ज्वलैर्निजप्रतापैर्वलयं ज्वलद्भुवः।**

**प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः।। १०**

**अन्वयः-**

राजघः सः अनल्पदग्धाऽरिपुराऽनलोज्ज्वलैः निजप्रतापैः ज्वलत् भुवो वलयं प्रदक्षिणीकृत्य जयाय सृष्टया नीराजनया रराज।

**व्याख्या-**

राजघः = शत्रुभूपालघातुकः, सः = नलः, अनल्पदग्धाऽरिपुराऽनलोज्ज्वलैः = बहुलभस्मीकृतशत्रुनगरवह्निप्रदीप्तैः, निजप्रतापैः = स्वतेजोभिः, ज्वलत् = दीप्तं, भुवः = भूमेः, वलयं = मण्डलं, प्रदक्षिणीकृत्य = प्रदक्षिणं विधाय, जयाय = जेतुं, सृष्टया = निर्मितया, नीराजनया = आरात्रिकेण, प्रतिपक्षराजाऽभावकरणेन वा, रराज = शुशुभे, नलस्य प्रतापो भूमण्डलव्यापकोऽभूदिति भावः।

**निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः।**

**न तत्यजुर्नूनमनन्यसंश्रयाः प्रतीपभूपालमृगीदृशां दृशः।। ११**

**अन्वयः-**

तेन अखिले महीतले निरीतिभावं गमिते निवारिता अतिवृष्टयः अनन्य संश्रयाः (सत्यः) प्रतीपभूपालमृगीदृशां दृशं नतत्यजुः नूनम्।

**व्याख्या-**

तेन = नलेन, अखिले = समस्ते, महीतले = भूतले, निरीतिभावम् = अतिवृष्ट्यादीतिभावराहित्यं, गमिते = प्रापिते सति, निवारिता = निराकृता,

अतिवृष्टयः = अतिवर्षाणि, अनन्यसंश्रयाः = अन्याश्रयस्थानरहिताः सत्यः, प्रतीपभूपालमृगीदृशां = शत्रुभूपतिसुन्दरीणां, दृशं = नेत्राणि, न तत्यजुः = त्यक्तवत्यः, नूनम् = इव।

**सितांऽशुवर्णैर्वयति स्म तद्गुणैर्महाऽसिवेम्नः सहकृत्वरी बहुम्।**

**दिगङ्गनाऽङ्गाभरणं रणाऽङ्गणे यशः पटं तद्भटचातुरी तुरी।। १२**

**अन्वयः-**

तद्भटचातुरी तुरी महाऽसिवेम्नः सहकृत्वरी रणाऽङ्गणे सितांऽशुवर्णैः दिगङ्गनाऽङ्गाभरणं बहुं यशःपटं वयति स्म।

**व्याख्या-**

तद्भटचातुरी = नलयोद्धचतुरता, तुरी = सूत्रवेष्टननलिका, महाऽसिवेम्नः = विशालखड्गवायदण्डस्य, सहकृत्वरी = सहकारिणा (सती), रणाऽङ्गणे = युद्धाऽजिरे, सितांऽशुवर्णैः = चन्द्रवर्णैः, शुक्लवर्णैरित्यर्थः। तद्गुणैः = नलशौर्यादिगुणैरेव तन्तुभिः, दिगङ्गनाऽङ्गाभरणं = दिशानार्यवयवभूषणं, बहुं = प्रचुरं, यशःपटं = कीर्तिवस्त्रं, वयति स्म = निर्मितवती।

**प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता।**

**अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तत।।१३**

**अन्वयः-**

प्रतीपभूपैः इव विरुद्धधर्मैः अपि ततो भिया भेत्तृता उज्झिता किम् यत् स अमित्रजित्, मित्रजित्, विचारदृक् अपि चारदृक् अवर्तत।

**व्याख्या-**

प्रतीपभूपैः इव = विरोधिभूपतिभिः इव, विरुद्धधर्मैः अपि = मिथोविरोधिधर्मैः अपि, ततः तस्मात् नलात् इत्यर्थः, भिया भयेन हेतुना, भेत्तृता भेदनकारिता, पक्षान्तरे भेदज्ञापकता, व्यावर्तकता इति भावः, उज्झिता किम् = परित्यक्ता किम्? यत् यस्मात्कारणात्, सः = नलः, ओजसा = तेजसा, अमित्रजित् = मित्रजिद्भिन्न, परं मित्रजित् मित्रजेता,अत्र योऽमित्रजित् मित्राजिद्भिन्नः स कथं मित्रजित् (मित्रजेता इति विरोधः प्रतीयते), तत्परिहारस्तु - ओजसा = प्रतापेन, अमित्रजित् = शत्रुजेता, तथा ओजसा = तेजसा, मित्रजित् = सूर्यजेता इति। इत्थमेव सः = नलः, विचारद्दृक् चारदृग्भिन्नः। परं चारदृक् चारद्दृष्टिः, अत्राऽपि यो विचारदृक् (चारदृग्भिन्नः) स कथं चारदृक् (चारद्दृक्)इति विरोधः प्रतीयते, तत्परिहारस्तु – विचारदृक् = विचारपूर्वकं द्रष्टा, चारदृक् = गुप्तचरनेत्रः, अवर्तत= आसीत्।

**तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा।**

**तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि।। १४**

**अन्वयः-**

विधिः तदोजसः तद्यशसः स्थितौ इमौ वृथा इति यदा यदा चित्ते कुरुते, तदा परिवेषकैतवात् भानोः विधोः अपि कुण्डलनां तनोति।

**व्याख्या-**

विधिः = ब्रह्मा, तदोजसः = नलतेजसः, तद्यशसः = नलकीर्तेः, स्थितौ = विद्यमानतायाम्, इमौ = भानुविधू, सूर्यचन्द्रावित्यर्थः। वृथा = व्यर्थप्रायौ, निष्फलाविति भावः। इति = इत्थं, यदा यदा = यस्मिन् यस्मिन् समये, चित्ते

= मनसि, कुरुते = विधत्ते, विमृशतीति भावः। तदा = तस्मिन् तस्मिन् समये, परिवेषकैतवात् = परिधिच्छलात्, भानोः = सूर्यस्य, विधोः अपि = चन्द्रमसः अपि, कुण्डलनां = वैयर्थ्यसूचकं रेखामण्डलं, तनोति = विस्तारयति।

**अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।**

**मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः।। १५**

**अन्वयः-**

अल्पितकल्पपादपो नृपः अर्थिजनस्यललाटे अयं दरिद्रो भविता इति जाग्रतीं वैधसीं लिपिं दारिद्र्यदरिद्रतां प्रणीय मृषा न चक्रे।

**व्याख्या-**

नलस्य दानशौण्डत्वं श्लोकद्वयेन प्रतिपादयति - अयमिति। अल्पितकल्पपादपः = अल्पीकृतकल्पवृक्षः, नृपः = नैषधः, अर्थिजनस्य = याचकजनस्य, ललाटे = भाले, अयं = एषः, जनः = नरः, दरिद्रः = निस्वः, भविताः = भविष्यति, इति = इत्थं, जाग्रतीं = सदा स्थितां, वैधसीं = ब्रह्मसम्बन्धिनीं, लिपिं = लिबिं, वर्णावलीमिति भावः, दारिद्र्यदरिद्रतां = दरिद्रताऽभावं, प्रणीय = निर्माय, मृषा = मिथ्या, न चक्रे = न कृतवान्, एतेन याचितपदार्थस्य दातुः कल्पपादपान्नलस्योत्कर्षाऽतिशयो द्योत्यते।

**विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः।**

**अमानि तत्तेन निजाऽयशोयुगं द्विफालबद्धाश्चिकुराः शिरः स्थितम्।। १६**

**अन्वयः-**

विभज्य मेरुः यत् अर्थिसात् न कृतः, उत्सर्गजलव्ययैः सिन्धुः, यत् मरुः न कृतः, तत् तेन द्विफालबद्धाः चिकुराः शिरः स्थितं निजाऽयशोयुगम् अमानि।

**व्याख्या-**

विभज्य = विभागं कृत्वा, खण्डशो विधायेति भावः। मेरुः = सुमेरुपर्वतः, यत् = यस्मात्कारणात्, अर्थिसात् = याचकाऽधीनः, कृतः = नो विहितः, एवं च उत्सर्गजलव्ययैः = दानसलिलोपयोगैः, सिन्धुः = समुद्रः। यत् = यस्मात् कारणात्, मरुः = धन्वा, निर्जलदेश इति भावः, न कृतः = नो विहितः। तत् = तस्मात् कारणद्वयात्, तेन = नलेन, द्विफालबद्धाः = द्विभागनद्धा, चिकुराः = केशाः उद्देश्यवाचकं पदमेतत्। शिरः स्थितं = स्वमस्तकस्थं, निजाऽयशोयुगम् = स्वककीर्तियुग्मं, विधेयवाचकं पदमेतत्। अमानि = मतं, विचारितमिति भावः।

**अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च।**

**दधौ पटीयान्समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने।। १७**

**अन्वयः-**

पटीयान् दिनेश्वरश्रीः अयं देवः अजस्रम् अभ्यासम् उपेयुषा कविना बुधेन च समं मुदा एव समयं नयन् दिने दिने उदयं दधौ।

**व्याख्या-**

पटीयान् = कार्यकुशलः, दिनेश्वरश्रीः = सूर्यसमतेजाः, अयं = वर्ण्यमानः, देवः = राजा, नल इत्यर्थः। अजस्रम् निरन्तरम्, अभ्यासम् = समीपम्, उपेयुषा प्राप्तवता, कविना = काव्यकर्त्रा शुक्रेन च, बुधेन = पण्डितेन, चन्द्रपुत्रग्रहेण च, समं = सह, मुदा एव = आनन्देन एव, समयं = कालं,

नयन् = यापयन्, दिने दिने = प्रतिदिनम्, उदयं उन्नतिं उदयपर्वतसम्बन्धं च, दधौ = धृतवान्।

**अधोविधानत्कमलप्रवालयोः शिरःसु धानादखिलक्षमाबुजाम्।**

**पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याऽङ्‌िकतमूर्ध्वरेखया।। १८**

**अन्वयः-**

कमलप्रवालयोः अधोविधानात् अखिलक्षमाभुजां शिरः सु धानात् इदम् ऊर्ध्वं पुरा भवति इति वेधसा अस्य पदम् ऊर्ध्वरेखया अङ्‌िकतं किम् ?

**व्याख्या-**

कमलप्रवालयोः = कमलपल्लवयोः, अधोविधानात् = तिरस्करणात्, अरुणतास्निग्धतामृदुत्वाऽतिशयैरिति शेषः। तथा अखिलक्षमाभुजां = सकलभूपालानां, शिरः सु = मस्तकेषु, धानात् = स्थापनात्, इदम् = पदम्, ऊर्ध्वं = उपरिवर्ति, पुरा भवति = भविष्यति इति = हेतोः, वेधसा = ब्रह्मणा, अस्य = नलस्य, पदम् = चरणम्, ऊर्ध्वरेखया = उच्चरेखया, अङ्‌िकतं किम् = चिह्नितं किम्?

**जगज्जय तेन च कोशमक्षयं प्रणीतवान्शैशवशेषवानयम्।**

**सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथाऽऽलिङ्गदथाऽस्य यौवनम्।। १९**

**अन्वयः-**

शैशवशेषवान् अयं जगज्जयं, तेन च कोशम् अक्षयं प्रणीतवान्। अयं रतीशस्य सखा ऋतुः यथा वनं, तथा यौवनम् अस्य वपुः आलिङ्गत्।

**व्याख्या-**

शैशवशेषवान् = बाल्याऽवशेषयुक्तः, षोडषवर्षदेशीय इति भावः। अयं = नलः, जगज्जयं = लोकविजयं, तेन च जगज्जयेन च, कोशम् भाण्डारगृहम्, अक्षयं क्षयरहितं, परिपूर्णमिति भावः, प्रणीतवान् कृतवान्। अथ अनन्तरं, शैशवाऽपगमानन्तरमिति भावः। रतीशस्य रतिपतेः, कामदेवस्येति भावः, सखा सहचरः, मित्रमित्यर्थः। ऋतुः वसन्तः, यथा येन प्रकारेण, वनं काननम्, आलिङ्गति, तथा तेन प्रकारेण, यौवनम् तारुण्यम्, अस्य नलस्य, वपुः शरीरम्, आलिङ्गत् आलिङ्गितवत्, आश्रयदित्यर्थः। नलस्य यौवनप्रादुर्भावो जात इति भावः।

**अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे।**

**तदास्यदास्येऽपि गतोऽधि कारितां न शारदः पार्विकशर्वरीश्वरः।। २०**

**अन्वयः-**

तदङ्घ्रिणा पद्मेषु घृणा अकारि। तच्छयच्छायलवोऽपि पल्लवे क्व ? शारदः पार्विकशर्वरीश्वरः तदास्यदास्ये अपि अधिकारितां न गतः।

**व्याख्या-**

तदङ्घ्रिणा = नलचरणेन, पद्मेषु = कमलेषु, घृणा = जुगुप्सा, अकारि = धृता, नलचरणापेक्षया कमलानां निकृष्टत्वादिति भावः। तच्छयच्छायलवोऽपि = नलपाणिकान्तिलेशः अपि। पल्लवे = किसलये, क्व = कुत्र, नलपाणितः कमलानां हीनत्वादिति भावः। शारदः = शरदभ्युदितः, पार्विकशर्वरीश्वरः = पूर्णिमाचन्द्रः, षोडशकलासम्पूर्ण इति भावः। तदास्यदास्ये अपि = नलमुखदासभावे अपि, अधिकारितां = योग्यतां, न गतः = न प्राप्तः, शारदपूर्णचन्द्रोऽपि नलमुखतो हीन आसीदिति भावः।

**किमस्य रोम्णां कपटेन कोटिभिर्विधिर्न लेखाभिरजीगणद् गुणान् ?**

**न रोमकूपौधमिषाज्जगत्कृता कृताश्च किंक दूषणशून्यबिन्दवः ?२१**

**अन्वयः-**

विधिः रोम्णां कपटेन कोटिभिः लेखाभिः अस्य गुणान् किं न अजीगणत् ? जगत्कृता रोमकूपौधमिषात् दूषणशून्यबिन्दवश्च किं न कृता ?

**व्याख्या-**

विधिः = ब्रह्मा, रोम्णां = लोम्नां, कपटेन = व्याजेन, कोटिभिः = सार्धत्रिकोटिसंख्याभिः, लेखाभिः = रेखाभिः, अस्य = नलस्य, गुणान् = शौर्यौदार्यसौन्दर्यादीन्, किं न अजीगणात् = किं न गणितवान्, अजीगणत् इति भावः। तथैव जगत्कृता = लोकसृजा, ब्रह्मणेति भावः, अस्य रोमकूपौधमिषात् = लोमकूपसमूहच्छलात्, दूषणशून्यबिन्दवः = दोषाऽभाववृषताः, किं न कृता = किं नो विहिताः, कृता एवेति भावः, नलस्य गुणा अतिप्रचुरा दोषाणां सुतरामभाव इति भावः।

**अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीताऽर्गलदीर्घपीनता।**

**उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरः प्रसारिता।। २२**

**अन्वयः-**

अमुष्य दोर्भ्याम् अरिदुर्गलुण्ठने अर्गलदीर्घपीनता गृहीता ध्रुवम्। तत्र उरःश्रिया च गोपुरस्फुरत्कपाटदुर्धर्षतिरः प्रसारिता गृहीता ध्रुवम्।

**व्याख्या-**

अमुष्य = नलस्य, दोर्भ्याम् = बाहुभ्याम्, अरिदुर्गलुण्ठने = शत्रुदुर्गामस्थलबलात्कारग्रहणे, अर्गलदीर्घपीनता = विष्कम्भायतपुष्टता, गृहीता ध्रुवम् = उपात्ता किम्? तत्र = अरिदुर्गलुण्ठने, उरःश्रिया च = वक्षःस्थलसम्पत्या च, गोपुरस्फुरत्कपाटदुर्धर्षतिरः प्रसारिता = पुरद्वारप्रकाशमानकपाटाऽधृष्यता तिर्यक्प्रसरणशीलता च, गृहीता ध्रुवम् = उपात्ता किमु।

**स्वकेलिलेशस्मितनिर्जितेन्दुनः निजांऽशदृक्तर्जितपद्मसम्पदः।**

**अतद्द्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराऽचरे।। २३**

**अन्वयः-**

स्वकेलिलेशस्मितनिर्जितेन्दुनः निजांऽशदृक्तर्जितपद्मसम्पदः तन्मुखस्य प्रतिमा अतद्द्वयीजित्वरसुन्दराऽन्तरे चराऽचरे न।

**व्याख्या-**

स्वकेलिलेशस्मितनिर्जितेन्दुनः = आत्मक्रीडालवमन्दहास्य- विजितचन्द्रस्य, निजांऽशदृक्तर्जितपद्मसम्पदः = स्वभागनेत्रभर्त्सितकमलश्रियः, तन्मुखस्य = नलाननस्य, प्रतिमा = उपमा, अतद्द्वयीजित्वरसुन्दराऽन्तरे = चन्द्रपद्मजेतृरुचिरपदार्थरहिते, चराऽचरे = जङ्गमस्थावरात्मके जगति, न = न अवर्तत।

**सरोरुहं तस्य दृशैव निर्जितं, जिताः स्मितेनैव विधोरपि श्रियः।**

**कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता।। २४**

**अन्वयः-**

तस्य दृशा एव सरोरुहं तर्जितम्। (तस्य) स्मितेन न विधोः अपि श्रियः जिताः। (आभ्याम्) परं भव्यं कुतः ? अहो तदाननस्य उपमितौ महीयसी दरिद्रता।

**व्याख्या-**

तस्य = नलमुखस्य, दृशा एव = नेत्रेण एव, सरोरुहं = कमलं, तर्जितम् = भर्त्सितम्। तस्य स्मितेन एव = मन्दहास्येन एव, विधोः अपि = चन्द्रमसः अपि, श्रियः = शोभाः, जिताः = निर्जिताः, (आभ्याम् = सरोरुहविधुभ्याम्) परं = अन्यत्, भव्यं = सुन्दरं वस्तु, कुतः = कस्मात्, उपलभ्येति शेषः। अहो = आश्चर्यम्। तदाननस्य = नलमुखस्य, उपमितौ = तुलनायां, महीयसी = अतिमहती, दरिद्रता = वचनसम्पत्तेरभावः। कवीनामिति शेषः, सर्वथा विरुपमं नलमुखमिति भावः।

**स्ववालभारस्य तदुत्तमाऽ ङ्गजैः समं चमर्येव तुलाऽभिलाषिणः।**

**अनागसे शंसति बालचापलं पुनः पुनः पुच्छविलोलनच्छलात्।। २५**

**अन्वयः-**

चमरी एव तदुत्तमाऽङ्गजैः समं तुलाभिलाषिणः स्ववालभारस्य अनागसे पुनः पुनः पुच्छविलोलनच्छलात् बालचापलं शंसति।

**व्याख्या-**

चमरी एव = चमरमृगी एव, तदुत्तमाऽङ्गजैः समं = नलकेशैः सह, तुलाभिलाषिणः = साम्यकामिनः, स्ववालभारस्य = आत्मकेशकलापस्य, अनागसे = अपराधाऽभावाय, पुनः पुनः = भूयो भूयः, पुच्छविलोलनच्छलात्

= लाङ्गूलसञ्चालनव्याजात्, बालचापलं = रोमचाञ्चल्यं यद्वा, शिसुचाञ्चल्यं, शंसति = सूचयति। यथा माता महापुरुषः समं संघर्षशीस्य स्वपुत्रस्याऽपराधाऽभावप्रतिपादनाय एतेन मतिपूर्वकं नैतदाचरितम् बालत्वान्मूर्खत्वादेव इत्थमाचरितमिति कथयति तथैव चमर्यपि नलकेशैः समं साम्यं वाञ्छतो निजवालभारस्याऽपराधाऽभावप्रतिपादनार्थं पुच्छविलोलनच्छलात् इदं चापलं बालत्वेन कृतमिति सूचयतीति भावः।

**महीभृतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया।**

**द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां मन्मथविभ्रमोऽभवत्।। २६**

**अन्वयः-**

तस्य महीभृतः मन्मथश्रिया तं प्रति निजस्य चित्तस्य इच्छया च तत्र नृपे जगत्त्रयीभवां नतभ्रुवां द्विधा मन्मथविभ्रमः अभवत्।

**व्याख्या-**

तस्य = पूर्वोक्तस्य, महीभृतः = राज्ञः नलस्येति भावः। मन्मथश्रिया = कामसदृशशोभया, तं प्रति = नलं प्रति, निजस्य = स्वस्य, चित्तस्य = मनसः, इच्छया च = स्पृहया च, तत्र = तस्मिन्, नृपे = राजनि, नल इति भावः। जगत्त्रयीभवां = लोकत्रितयोत्पन्नानां, नतभ्रुवां = सुन्दरीणां, द्विधा = द्वाभ्यां, प्रकाराभ्यां, मन्मथविभ्रमः कामभ्रान्तिः, कामविलासश्च। अभवत् = अभूत्। लोकत्रितयसुन्दरीणां कामसदृशे नले अयं मन्मथ इति भ्रमो मन्मथविलासश्चाऽभवदिति भावः।

**निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः।**

**अमूस्तमभ्यासभरं विवृण्वते निमेषनिःस्वरधुनाऽपि लोचनैः।। २७**

**अन्वयः-**

त्रिदशीभिः निमीलनभ्रंशजुषा दृशा तं भृशं निपीय यः अर्जितः। अमूः अधुना अपि निमेषनिःस्वैः लोचनैः तं अभ्यासभरं विवृण्वते।

**व्याख्या-**

त्रिदशीभिः = देवीभिः, निमीलनभ्रंशजुषा = मुद्रणनिवृत्तिसेविन्या, निमेषव्यापारशून्यया इति भावः। एतादृश्या दृशा = दृष्ट्या, तं = नलं, भृशं = अत्यर्थं, निपीय पानं कृत्वा, प्रणयाऽतिशयेन दृष्ट्वेति भावः। यः अभ्यासभरः, अर्जितः = उपार्जितः। अमूः = त्रिदश्यः, देव्य इत्यर्थः। अधुना अपि = इदानीम् अपि, निमेषनिःस्वैः = निमेषव्यापाररहितैः, लोचनैः = नेत्रैः, तं = पूर्वोपार्जितम्, अभ्यासभरं = अनुशीलनोत्कर्ष, विवृण्वते = प्रकटयन्ति।

**अदस्तदार्कर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाऽफलम्।**

**इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदाऽऽत्मनः।। २८**

**अन्वयः-**

चक्षुःश्रवसां प्रियाः अदः नः दृशोः द्वयं तदाकर्णि (सत्) फलाढ्यजीवितं, तदवीक्षि (सत्) अफलं च इति नले आत्मनः हृदा तत् स्तुवन्ति स्म निन्दन्ति स्म च।

**व्याख्या-**

चक्षुःश्रवसां = सर्पणां, प्रियाः वल्लभाः, सर्प्य इत्यर्थः। अदः = इदं, नः =अस्माकं, दृशोः = नेत्रयोः, द्वयं = द्वितयं, दृग्द्वयमित्यर्थः। तदाकर्णि नलश्रवणशीलं सत्, फलाढ्यजीवितं = सफलजीवितं, वर्तत इति शेषः। एवं च तदवीक्षि = नलाऽवेक्षणरहितं सत्, अफलं च = निफलं च, इति =

अस्माद्धेतोः, नले = नैषधविषये, आत्मनः = स्वस्य, तत् दृशोर्द्वयं, स्तुवन्ति स्म = प्रशंसन्ति स्म, नलाकर्णित्वेनेति शेषः। निन्दन्ति स्म च = जुगुप्सन्ते च नलाऽवीक्षित्वेनेति शेषः।

**विलोकयन्तीभिरजस्रभावनाबलादमुं नेत्रनिमीलनेष्वपि।**

**अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्मितः।। २९**

**अन्वयः-**

अजस्रभावनाबलात् नेत्रनिमीलनेषु अपि अमुं विलोकयन्तीभिः मर्त्याभिः अमुष्य दर्शने निमेषनिर्मितः विघ्नलेशः अपि न अलम्भि।

**व्याख्या-**

अजस्रभावनाबलात् = निरन्तरचिन्तनशक्तेः, नेत्रनिमीलनेषु अपि = नयनमुद्रणेषु अपि, अमुं = नलं, विलोकयन्तीभिः = पश्यन्तीभिः, मनसेति शेषः। तादृशीभिः मर्त्याभिः = मानुषीभिः स्त्रीभिः, अमुष्य = नलस्य, दर्शने = विलोकने, निमेषनिर्मितः = नेत्रनिमीलनरचितः, विघ्नलेशः अपि = अनतरायलवः अपि, न अलम्भि = नो लब्धः।

**न का निशि स्वप्नगतं ददर्श तं, जगाद गोत्रस्खलिते च का न तम्।**

**तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम्।।३०**

**अन्वयः-**

का निशि स्वप्नगतं तं न ददर्श। का च गोत्रस्खलिते तं न जगाद। का च रते तदात्मताध्यातधवा (सती) स्वमनोभवोद्भवं न चकार।

**व्याख्या-**

का = स्त्री, निशि = रात्रौ, स्वप्नगतं = स्वपप्राप्तं, तं = नलं, न ददर्श नो दृष्टवती, अपि तु सर्वा अपि ददर्शेति भावः। का च स्त्री, गोत्रस्खलिते = नामविपर्यासे, तं = नलं, न जगादनो बभाषे, अपि तु सर्वा एव जगाद इति भावः। का च = स्त्री, रते = सुरतकेलौः, तदात्मताध्यातधवा = नलरूपचिन्तितभर्तृका सती, स्वमनोभवोद्भवं = निजचित्तकामोत्पत्तिं, न चकार = न कृतवती, अपि तु सर्वा एव चकारेति भावः।

**श्रियाऽस्य योग्याऽहमिति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः।**

**विहाय भैमीमपदर्पया कया न दर्पणः श्वासमलीमसः कृतः।। ३१**

**अन्वयः-**

भैमीं विहाय कया सुरूपया तम् आलोक्य श्रिया अहम् अस्य योग्या इति स्वं ईक्षितुं करे धृतः दर्पणः अपदर्पया (सत्या) श्वासमलीमसः न कृतः ?

**व्याख्या-**

भैमीं = दमयन्तीं, विहाय = त्यक्त्वा, कया, सुरूपया = सुन्दर्या, तम् = नलम्, आलोक्य, श्रिया = शोभया, अहम्, अस्य = नलस्य, योग्या = अनुरूपा, इति = एवं, विचार्येति शेषः स्वं = आत्मानम्, ईक्षितुं = द्रष्टुं, करे = हस्ते, धृतः = गृहीतः, दर्पणः = आदर्शः, अपदर्पया = गताऽभिमानया सत्या, श्वासमलीमसः = निश्वासमलिनः, न कृतः = नो विहितः, भैमीं विहाय सर्वथा निःश्वासवातेन दर्पणो मलिनीकृत इति भावः।

**यथोह्यमानः खलु भोगभोजिना प्रसह्य वैरोचनिजस्य पत्तनम्।**

**विदर्भजाया मदनस्तथा मनो नलाऽवरुद्धं वयसैव वेशितः।।३२**

**अन्वयः-**

यथा भोगभोजिना वयसा एव उह्यमानः मदनः अनलाऽवरुद्धं वैरोचनिजस्य पत्तनं प्रसह्य वेशिनः खलु। तथा भोगभोजिना वयसा एव उह्यमानः मदनः नलाऽवरुद्धं विदर्भजाया मनः प्रसह्य वेशितः खलु।

**व्याख्या-**

यथा = येन प्रकारेण, भोगभोजिना = सर्पशरीरभोक्त्रा, वयसा एव पक्षिणा एव, गरुडेनेत्यर्थः। उह्यमानः = प्राप्यमाणः, मदनः कामः प्रद्युम्न इत्यर्थः। अनलाऽवरुद्धं = अग्निपरिवृतं, वैरोचनिजस्य बाणाऽसुरस्य, पत्तनं = नगरं, शोणितपुरमिति भाव। प्रसह्य = बलेन, वेशितः = प्रवेशितः, खलु = निश्चयेन। तथा = तेन प्रकारेण, भोगभोजिना = सुखाऽनुभाविना, वयसा एव अवस्थया एव, तारुण्येन एवेत्यर्थः = उह्यमानः। वितर्क्यमाणः, मदनः = कामः, नलाऽवरुद्धं = नैषधसम्बद्धं, विदर्भजाया = वैदर्भ्याः, दमयन्त्या इति भावः। मनः = चित्तं, प्रसह्य = बलेन, वेशितः प्रवेशितः, खलु निश्चयेन। नलस्य गुणगणश्रवणोत्तरं दमयन्त्या मनसि यौवनेनैव नलविषयकः कामावेशः प्रापित इति भावः।

**नृपेऽनुरूपे निजरूपसम्पदां दिदेश तस्मिन्बहुशः श्रुतिं गते।**

**विदिश्य सा भीमनरेन्द्रनन्दना मनोभवाज्ञैकवशंवदं मनः।। ३३**

**अन्वयः-**

सा भीमनरेन्द्रनन्दना निजरूपसम्पदाम् अनुरूपे तस्मिन् नृपे बहुशः श्रुतिंगते विशिष्य मनोभवाज्ञैकवशंवदं मनः दिदेश।

**व्याख्या-**

सा = पूर्वोक्ता, भीमनरेन्द्रनन्दना = भीमभूपतनया, दमयन्तीत्यर्थः, निजरूपसम्पदाम् = स्वसौन्दर्यसम्पत्तीनाम्, अनुरूपे = योग्ये, तस्मिन् = पूर्वोक्ते, नृपे = राजनि, नल इत्यर्थः। बहुशः = अनेकवारं, श्रुतिं = श्रवणगोचरं, गते = प्राप्ते सति। विशिष्य = अतिशयेन, मनोभवाज्ञैकवशंवदं = कामदेवादेशैकाधीनं, मनः = चित्तं, दिदेश = अर्पितवती, नलं प्रति चित्तं निदधाविति भावः।

**उपासनामेत्य पितुः स्म रज्यते दिने दिने साऽनसरेषु वन्दिनाम्।**

**पठत्सु तेषु प्रति भूपतीनलं विनिद्ररोमाऽजनि श्रृण्वती नलम्।। ३४**

**अन्वयः-**

सा दिने दिने वन्दिनाम् अवसरेषु पितुः उपासनाम् एत्य रज्यते स्म। तेषु भूपतीनाम् प्रति पठत्सु नलं श्रृण्वती अलं विनिद्ररोमा अजनि।

**व्याख्या-**

